Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
( Fulfilled Suggests Parametres of UGC by IJMER)
Volume:14, Issue:8(3), August, 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed : Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available : www.ijmer.in

# मुण्डकोपनिषदि परमात्मतत्त्वविज्ञानम्

**डा. रा. सुब्रह्मण्य भिडे, सहायाचार्यः,**
**श्रीवेङ्कटेश्वरवेदविश्वविद्यालयः, तिरुपतिः**

भारतीय-आध्यात्मिक-तत्वचिन्तनवाङ्मये बह्वीषु उपनिषत्सु सत्स्वपि -

**ईश-केन-कठ-प्रश्न-मुण्ड-माण्डूक्य-तित्तिरिः।**
**ऐतरेयं च छान्दोग्यं बृहदारण्यकं दश॥**

इति दशोपनिषदः प्रधानतया गण्यन्ते । अत्र दशसु प्रश्न-मुण्डक-माण्डूक्योपनिषदः अथर्ववेदसम्बद्धाः भवन्ति । एताश्च तिस्रोऽप्युपनिषदः ज्ञानमार्गे जिगमिषूणां तत्त्वज्ञानप्रकाशकाः प्रदीपाः भवन्ति ।

तत्र मुण्डकोपनिषदि प्रथममुण्डकम् द्वितीयमुण्डकम् इत्यादिनाम्ना विभागत्रयं भवति । प्रथममुण्डके खण्डिकाद्वये, विद्यापरम्परा, परा अपरा चेति विद्याविभागः, तत्स्वरूपं, अपरविद्याविषयः, केवलकर्मनिन्दा, गुरुमुखेनैव पराविद्यायाः अधिगमनम् , अधिकारिलक्षणम् इमे विषयाः कथिताः।

द्वितीयमुण्डके च खण्डिकाद्वये सर्वजगतः, उत्पत्तेः प्रलयस्य च कारणम् अक्षराख्यम् आत्मेति विचारः, तस्य अक्षराख्यस्य आत्मनः अधिगमोपायः, परमात्मज्ञानफलम् ब्रह्मैव परमार्थसत्यम् इतीमे विषयाश्चिन्तिताः।

तृतीयमुण्डकेऽपि खण्डिकाद्वये परमात्मदर्शनफलम् , आत्मदर्शनसाधनानि, ज्ञानिनः सर्वकामावाप्तिः, आत्मज्ञशुश्रूषूणां निष्कामानां मोक्षः, आत्मप्राप्त्यै सहकारिसाधनानि, ज्ञानिनः ब्रह्मभावः इत्यदयो विषयाः बोधिताः।

मुण्डकोपनिषत् **ब्रह्मा देवानां प्रथमः सम्बभूव** (मुं.१.१.१) इति आरब्धा सती आदौ विद्यापरम्परां दर्शयति । तत्र, ब्रह्मा अथर्वाय ब्रह्मविद्यां प्राह । अथर्वा अङ्गिरे, अङ्गीः सत्यवहाय, सत्यवहः अङ्गिरसे प्राह । तम् अङ्गिरसं शौनकस्य **कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवती** (मुं.१.१.३) ति प्रश्नपुरस्सरम् इयमुपनिषत् आरभ्यते ।

अस्यामुपनिषदि कांश्चन विशेषान् पश्यामः । यथा - 'परा अपरा चेति विद्याविभागोपदेशः' (मुं.१.५.६) 'अक्षराख्यात् पुरुषाख्यात् वा आत्मनः समस्तविश्वोत्पत्ति-र्भवतीत्युपदेशः' (मुं.१.१.७-९, २.१.१-२.१.१०) 'गुरोः सकाशादेव ब्रह्मज्ञानान्वेषणं कुर्यादित्युपदेशः' (मुं.१.२.१२) 'शरस्य लक्ष्यैकात्मत्वं फलं यथा, तद्वत् ब्रह्मज्ञानान्वेषणे तन्मयो भवेदित्युपदेशः' (मुं.२.२.३-४) 'सकामानामपि ज्ञानिनः शुश्रूषा विभूतिप्रदा भवती'त्युपदेशः (मुं.३.१.१०) 'आत्मज्ञानप्राप्त्यर्थम् आत्मवरणमेव मुख्योपायः' इत्युपदेशः (मुं.३.२.३) तथा ब्रह्मज्ञानप्राप्त्यर्थं सहकारिसाधनानि (मुं.३.१.५) 'ज्ञानिनः ब्रह्मभावोपदेशः' (मुं.३.२.९) इत्येवं बहवो विशिष्टांशाः सन्ति । एषां विशिष्टांशानां मध्ये केचन अंशाः अत्र निरूपणार्थं उपादीयन्ते । एवञ्च अस्यामेव उपनिषदि **सत्यमेव जयते नानृतम्** (मुं.३.१.६) इति प्रसिद्धं वचनं, **काली कराली** (मुं.१.२.४) इति अग्नेः सप्तजिह्वानां विवरणमपि लभ्यते ।

**पराऽपरेति विद्याविभागः**

एवञ्चात्र परा अपरा चेति विद्याविषये इत्थमुच्यते -

**तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति॥**

**अथ परा, यया तदक्षरमधिगम्यते यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुःश्रोत्रं तदपाणिपादम् । नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययं यद्भूतयोनिं परिपश्यन्ति धीराः** ॥ (मुं.१.१.५-६) इति ।

अङ्गसहिताः ऋग्वेदादयश्चत्वारो वेदाः अपरा विद्या इत्युच्यते । पराविद्यायाः अपराविद्यायाश्च वैलक्षण्यमिदमस्ति यत् - अपरविद्याविषयककर्मकाण्डविषये यथा विधिविषये कर्त्रादि-अनेककारक-उपसंहारद्वारेण वाक्यार्थकालादन्यस्मिन् काले अग्निहोत्रादिलक्षणः अनुष्ठेयोऽर्थः भवति, तथा पराविद्यायां विषये अनुष्ठेयोऽर्थः अन्यो न भवति । अनुभवपूर्वकं वाक्यार्थज्ञानसमकाले एव पर्यवसितो भवति । नाम कर्मज्ञानोदयानन्तरं, भविष्यति काले स्वर्गादिफलप्राप्तये कर्मानुष्ठानं कर्तव्यं भवति । परविद्याफलम्

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
( Fulfilled Suggests Parametres of UGC by IJMER)
Volume:14, Issue:8(3), August, 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed : Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available : www.ijmer.in

आत्मप्राप्तिस्तु न भन्या । भूतत्वात् जिज्ञासोः, आत्मत्वेन अक्षरस्य नित्यप्राप्तत्वात् , अविद्यामात्र-व्यवहितत्वाच्च ज्ञानमात्रमपेक्षते न अनुष्ठानान्तरम् इति भावः । एवं पराविद्यायाः अपराविद्यायाश्च वैलक्षण्यं भवति ।

**अक्षराख्यादात्मनः विश्वोत्पत्तिः**

पूर्वस्मिन् मन्त्रे अक्षरं भूतयोनिरित्युक्तम् । तत्र दृष्टान्तः एवमुच्यते –

**यथोर्णनाभिः सृजते गृह्णते च यथा पृथिव्यामोषधयः सम्भवन्ति ।**
**यथा सतः पुरुषात् केशलोमानि तथाक्षरात्सम्भवतीह विश्वम् ॥**(मुं.१.१.७) इति।

यथा लोके ऊर्णनाभिः लूताकीटः किञ्चित् कारणान्तरमनपेक्ष्य स्वयमेव स्वशरीरात् अव्यतिरिक्तान् तन्तून् सृजते, पुनस्तानेव गृह्णाति स्वात्मभावमापादयति, यथा च पृथिव्यां स्वात्म-अव्यतिरिक्ता ओषधयः सम्भवन्ति, यथा च जीवतः पुरुषात् केशलोमानि विलक्षणानि सम्भवन्ति, तथा विलक्षणं सलक्षणं च निमित्तान्तर-अनपेक्षात् अक्षरात् इदं समस्तं विश्वं समुत्पद्यते इत्युक्त्वा, ततः सृष्टेः क्रमनियमविवक्षया **तपसा चीयते ब्रह्म ततोऽन्नमभिजायते । अन्नात्प्राणो मनः सत्यं लोकाः कर्मसु चामृतम् ॥**(मुं.१.१.८) इत्यादिना, ब्रह्मणः अव्याकृतम्, तस्मात् ज्ञानक्रियाशक्त्यधिष्ठितः हिरण्यगर्भः, मनः, आकाक्षादिभूतपञ्चकं, भूरादयः सप्तलोकाः, कर्माणि, कर्मफलम् , इत्येवं सृष्टिक्रमः प्रदर्श्यते ।

ततश्च द्वितीयमुण्डके - **एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च । खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी ॥** (मुं.२.१.३) इत्यादिना, अक्षरादेव प्राणः, मनः, इन्द्रियाणि, आकाशादयः एवं क्रमेण, ऋगादिवेदाः, यज्ञाः, यज्ञकर्मफलभूताः लोकाः, देव-मनुष्य-पशु-पक्षि-ओषधि-श्रद्धादयः, समुद्र-गिरि-नद्यादयः एते सर्वेऽपि अक्षरात् सम्भवन्तीत्युक्त्वा, एतत्सर्वं जातं जायमानं सर्वं **वाचारम्भणं विकारो नामधेयम् मृतिकेत्येव सत्यम्** (छां.६.४.२) इति छान्दोग्यश्रुत्युपदेशवत् इहापि, **'इदं विश्वं नाम पुरुषादन्यत् न किञ्चिदस्ति, पुरुष इत्येव सत्यम्'** इत्येतदुक्तुमारभते श्रुतिः –

**पुरुष एवेदं विश्वं, कर्म तपो ब्रह्म परामृतम् ।**
**एतद्यो वेद निहितं गुहायां सोऽविद्याग्रन्थिं विकिरतीह सोम्य॥**(मुं.२.१.१०) इति।

अतः उपनिषदारम्भे **'कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवती'**ति (मुं.२.१.१.३) यः प्रश्नः कृतः, तस्य समाधानं वदन्ती श्रुतिः - एतस्मिन् हि परस्मिन् आत्मनि सर्वकारणे पुरुषे विज्ञाते, पुरुष एवेदं विश्वं, नान्यदस्तीति विज्ञातं भवति । किं पुनरिदं विश्वं ? **'कर्म-ज्ञान-तत्कृतफलात्मकं जगद्रूपं पुरुषं सर्वप्राणिनां हृदि स्थितं मत्प्रत्यगात्माभिन्नं परं अमृतम् ब्रह्म' यः वेद सः इह जीवन्नेव (न मृतः सन्) अविद्यावासनां विनाशयति इत्यर्थः ।**

**ज्ञानमार्गप्रशंसा**

एवञ्चात्र उपनिषदि कर्ममार्गे बहुधा विपत्तयो भवन्तीति स्मार्यते । यद्यपि विधिनाचारितस्य कर्मणः स्वर्गफलं विद्यते, (मुं.१.२.५) तथापि बहुश्रमसाध्यत्वात् अस्वातन्त्र्यात् प्रमादादिदोषसम्भवात् कर्माणि श्रमफलानि भवन्तीत्येवमुच्यते –

**यस्याग्निहोत्रमदर्शमपौर्णमासमचातुर्मास्यमनाग्रयणमतिथिवर्जितं च ।**
**अहुतमवैश्वदेवमविधिना हुतमा सप्तमांस्तस्य लोकान् हिनस्ति ॥** (मुं.१.२.३) इति ।

अत्र अविधिना हुतम् यजमानस्य आ सप्तमान् लोकान् हिनस्ति इत्युक्तम्। अत्र भाष्यकाराः वदन्ति यत् - आ सप्तमान् लोकान् **हिनस्तीव** आयासमात्रफलत्वात् । सम्यक् क्रियमाणेषु कर्मसु कर्मपरिणामानुरूपेण भूरादयः सप्त लोकाः फलत्वेन प्राप्यन्ते । अविधिना आचरितेन कर्मणा तेषां लोकानां अप्राप्यत्वात् हिंस्यन्त इव इति । अतः प्लवरूपं अस्थिरफलं यज्ञरूपं कर्मैव श्रेयः इति ये अभिनन्दन्ति ते, कञ्चित्कालं स्वर्गे स्थित्वा जरां मृत्युं च पुनः पुनः प्राप्नुवन्ति, अविद्यायां वर्तमानाः वयमेव 'धीराः' 'पण्डिताः''कृतार्थाः' इति मत्वा, जरारोगादि-अनेकव्रातैः भृशं पीड्यन्ते, यथा अन्धेन नीयमाना अन्धाः गर्तादिषु पतन्ति तद्वत् पतन्ति, इत्यादिरूपेण बहुधा अप्रशंसा क्रियते एभिर्वाक्यैः -

**प्लवा ह्येते अदृढा यज्ञरूपा अष्टादशोक्तमवरं येषु कर्म ।**
**एतच्छ्रेयो येऽभिनन्दन्ति मूढा जरामृत्युं ते पुनरेवापि यन्ति॥**
**अविद्यायामन्तरे वर्तमानाः स्वयं धीराः पण्डितं मन्यमानाः ।**
**जङ्घन्यमाणाः परि यन्ति मूढा अन्धेनैव नीयमाना यथान्धाः॥**

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
( Fulfilled Suggests Parametres of UGC by IJMER)
Volume:14, Issue:8(3), August, 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed : Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available : www.ijmer.in
Cover Page

**अविद्यायां बहुधा वर्तमाना वयं कृतार्था इत्यभिमन्यन्ति बालाः।**
**यत्कर्मिणो न प्रवेदयन्ति रागात्तेनातुराः क्षीणलोकाश्च्यवन्ते॥**
**इष्टापूर्तं मन्यमाना वरिष्ठं नान्यच्छ्रेयो वेदयन्ते प्रमूढाः।**
**नाकस्य पृष्ठे ते सुकृतेऽनुभूत्वा इमं लोकं हीनतरं वा विशन्ति॥**(मुं.१.२.७ -१०) इति।

**आत्मलाभार्थं सर्वैराग्यं गुरूपसत्तिः**

एवञ्च पूर्वमुक्तप्रकारेण 'नाऽन्यः पन्थाः श्रेयसे अस्ती'ति मत्वा, सम्यक् परीक्ष्य वैराग्यं प्राप्य, ब्रह्मविज्ञानार्थं श्रोत्रियं ब्रह्मनिष्ठम् गुरुम् उपसीदेत् इति उपदिशति श्रुतिः। यथा –

**परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन ।**
**तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम् ॥**(मुं.१.२.१२) इति।

अत्र भाष्यकाराः वदन्ति यत् - एवं ऋग्वेदादि-अपरविद्याविषयं, (स्वाभाविक-अविद्या-काम-कर्म-दोषवत्पुरुषं प्रति कर्मणां विहितत्वात्) अविद्यादि-दोषवत्पुरुषानुष्ठेयं, तत्कर्मानुष्ठानफलभूतान्, दक्षिणोत्तरमार्गलक्षणान् विहित-अकरण-प्रतिषेध-अतिक्रम-दोषसाध्यान्, नरक-तिर्यक्-प्रेत-लक्षणान् संसारगतिभूतान्, अव्यक्तादिस्थावरान्तान् व्याकृताव्याकृतलक्षणान् बीजाङ्कुरवत् इतरेतरोत्पत्तिनिमित्तान् अनेकानर्थशतसहस्रसङ्कुलान् कदलीगर्भवत् असारान् मायामरीच्युदक-गन्धर्वनगराकार-स्वप्नजल-बुद्बुदफेनसमान् प्रतिक्षणप्रध्वंसान्, अविद्याकामदोषप्रवर्तितकर्मचितान् धर्वाधर्मनिवर्तितान् लोकान् पृष्ठतः कृत्वा, प्रत्यक्ष-अनुमान-उपमान-आगमैः परीक्ष्य सर्वतो याथात्मेन अवधार्य, वैराग्यम् आयात् । स वैराग्यप्रकारः एवं प्रदर्श्यते - इह संसारे कश्चिदपि अकृतः पदार्थः नास्ति । सर्व एव हि लोकाः कर्मचिताः। कर्मकृतत्वाच्चानित्याः । नित्यं न किञ्चिदस्तीत्यभिप्रायः। सर्वं तु कर्म अनित्यस्यैव साधनम् । यस्मात् चतुर्विधमेव हि सर्वं कर्म – 'कार्यम्' 'उत्पाद्यम्' 'आप्यम्' 'संस्कार्यं विकार्यं' वा । नातः परं कर्मणां विषयोऽस्ति । (अतः) अहं च नित्येन, अमृतेन, अभयेन, कूटस्थेन, अचलेन, ध्रुवेणार्थेन अर्थी न तद्विपरीतेन । अतः किं कृतेन कर्मणा आयासबहुलेन अनर्थसाधनेन ? इति वैराग्यमायादित्यभिप्रायः। एवं निर्विण्णः अभयं, शिवम्, अकृतं, नित्यं, पदं यत् (वर्तते,) तद्विज्ञानार्थं विशेषेण अधिगमार्थं, समित्पाणिः (सन्) गुरुमेव आचार्यं शमदमदयादिसम्पन्नम् , श्रोत्रियम् अध्ययनश्रुतार्थसम्पन्नं, ब्रह्मनिष्ठं (सर्वकर्माणि हित्वा केवलेऽद्वये ब्रह्मणि निष्ठा यस्य सः। 'जपनिष्ठः' 'तपोनिष्ठः' इति यद्वत् । न हि कर्मिणो ब्रह्मनिष्ठता संभवति । कर्मात्मज्ञानयोर्विरोधात् ।) अभिगच्छेत् । गुरुं विधिवत् प्रसाद्य अक्षरं पुरुषं सत्यम् पृच्छेत् , इति। अभिगच्छेत् । शास्त्रज्ञोऽपि स्वातन्त्र्येण ब्रह्मज्ञानान्वेषणं न कुर्यात् इत्येतत् 'गुरुमेव' इत्यवध्रियते ।

**आत्मज्ञानप्राप्त्यर्थं मुख्योपायः**

एवञ्च तर्हि आत्मज्ञानप्राप्त्यर्थं मुख्यः उपायः कः? इत्यत्र 'आत्मवरणमे' वेति, एवं कथयति श्रुतिः –

**नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन ।**
**यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनुं स्वाम्॥**(मुं.३.२.३) इति।

आत्मप्राप्त्यै प्रवचनादय उपायाः बाहुल्येन कर्तव्याः इति प्राप्ते इदम् उच्यते - अयमात्मा वेद-शास्त्राध्ययनबाहुल्येन प्रवचनेन न लभ्यः । तथा न मेधया ग्रन्थार्थधारणशक्त्या । न बहुना श्रुतेन नापि भूयसा श्रवणेन इत्यर्थः । तर्हि केन लभ्यः इति ? यमेव परमात्मानमेव एषः विद्वान् वृणुते प्राप्तुम् इच्छति, तेन वरणेन एष परमात्मा लभ्यः नान्येन साधनान्तरेण । तस्मात् अन्यत्यागेन आत्म(लाभ)प्रार्थनैव आत्मलाभसाधनम् इत्यर्थः।

**आत्मज्ञानप्राप्त्यर्थं सहकारिसाधनानि**

एवञ्च आत्मदर्शनं कथं साधयेदित्यत्र मुख्योपायत्वेन यमेवैष वृणुते तेन लभ्यः इत्युक्त। किन्तु मुख्योपायेन सह सत्यम् , तपः, ब्रह्मचर्यम् , सम्यज्ज्ञानम् , इत्यादीनि सहकारिसाधनानि भवन्तीत्युपदिश्यते अनेन मन्त्रेण –

**सत्येन लभ्यस्तपसा ह्येष आत्मा सम्यज्ज्ञानेन ब्रह्मचर्येण नित्यम् ।**
**अन्तःशरीरे ज्योतिर्मयो हि शुभ्रो यं पश्यन्ति यतयः क्षीणदोषाः॥**(मुं.३.१.५) इति।

अत्र भाष्यकाराः वदन्ति यत् - नित्यं सत्यादिसाधनैः आत्मा लभ्यते, न कादाचित्कैः सत्यादिभिरिति । नित्यं नाम सर्वदा इत्यर्थः। नित्यं सत्येन, नित्यं तपसा, नित्यं सम्यग्ज्ञानेन, नित्यं ब्रह्मचर्येण इति सर्वत्र नित्यशब्दः अनुषक्तव्यः । सत्येन अनृतत्यागेन

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
( Fulfilled Suggests Parametres of UGC by IJMER)
Volume:14, Issue:8(3), August, 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed : Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available : www.ijmer.in

मृषावचनत्यागेन। उच्यते च अन्यत्र येषां जिह्मादयः न भवन्तितैः प्राप्तुं शक्नुयात् । **'न येषु जिह्ममनृतं न माया'** (प्र. १.१६) इति । तपसा **'मनसश्चेन्द्रियाणां च ह्यैकाग्र्यं परमं तपः'** (मो.ध.२५०.४) इत्युक्तत्वात् इन्द्रियमन-एकाग्रतया इत्यर्थः। सम्यग्ज्ञानेन यथाभूतात्मदर्शनेन, ब्रह्मचर्येण मैथुन-असमाचारेण लभ्यः प्राप्तव्यः इत्यर्थः।

'एतैः साधनैर्लभ्यः आत्मा क्व लभ्यते' इत्यत्र उच्यते - यतनशीलाः क्षीणक्रोधादिचित्तमलाः संन्यासिनः अन्तःशरीरे पुण्डरीकाकाशे ज्योतिर्मयं शुद्धम् आत्मानम् उपलभन्ते इति ।

**ज्ञानिनो ब्रह्मभावः**

ज्ञानिनो ब्रह्मभावः कथं ? कथञ्च ब्रह्मविदो ब्रह्मधाम प्रविशन्ती'त्यत्र, 'ज्ञानिनः ब्रह्मप्राप्तिः सर्वात्मत्वेन भवती'ति श्रुत्या अनया एवमुच्यते -

**संप्राप्यैनमृषयो ज्ञानतृप्ताः कृतात्मानो वीतरागाः प्रशान्ताः ।**
**ते सर्वगं सर्वतः प्राप्य धीरा युक्तात्मानः सर्वमेवाविशन्ति ॥**(मुं.३.२.५) इति।

ऋषयः, नाम आत्मद्रष्टारो भूत्वा, तेनैव ज्ञानेन तृप्तास्सन्तः (न बाह्येन तृप्तिसाधनेन शरीरोपचयकारणेन) कृतात्मानः परमात्मस्वरूपेणैव निष्पन्नात्मानः, वीतरागाः विगतरागादिदोषाः, प्रशान्ताः उपरतेन्द्रियाः, एवंभूतास्सन्तः, एनमात्मानम् समवगम्य, सर्वगम् आकाशवत् सर्वव्यापिनम् सर्वत्र प्राप्य, (न उपाधिपरिच्छिन्नेन एकदेशेन) तद्ब्रह्मैव अद्वयम् आत्मत्वेन प्रतिपद्य, धीराः अत्यन्तविवेकिनः, युक्तात्मानः नित्यसमाहितस्वभावाः, सर्वमेव समस्तं 'ब्रह्म हि सर्वम्' इति ज्ञानेन तद्भावमापन्नाः, जीवन्त एव, तदूर्ध्वं च आविशन्ति, भिन्ने घटे घटाकाशवत् अविद्याकृतोपाधिपरिच्छेदं त्यक्त्वा (शरीरपातकालेऽपि) प्रविशन्तीत्यर्थः।

यद्यपि ज्ञानिदृष्ट्या नित्यमेव अशरीरत्वं (सू.भा.१.१.४) तथापि व्यावहारिकदृष्ट्या 'शरीरपातकालेऽपि' इत्युच्यते।

**देहारम्भिकप्राणादिकलानां कर्मसहितस्य विज्ञानात्मनः परमात्मन्येकीभावः**

किं च मोक्षकाले या देहारम्भिकाः कलाः प्राणाद्याः, ताः स्वं स्वं कारणं गमिष्यन्तीति वाक्यमिदं बोधयति -

**गताः कलाः पञ्चदश प्रतिष्ठा देवाश्च सर्वे प्रतिदेवतासु ।**
**कर्माणि विज्ञानमयश्च आत्मा परेऽव्यये सर्व एकीभवन्ति ॥**(मुं.३.२.७) इति।

किं च मोक्षकाले या देहारम्भिकाः कलाः प्राणाद्याः ताः स्वाः प्रतिष्ठाः गताः । स्वं स्वं कारणं गमिष्यन्तीति भावः। पञ्चदश पञ्चदशसंख्याकाः **'स प्राणमसृजत । प्राणाच्छ्रद्धाम्'** इत्यादिना प्रश्नोपनिषत्पठिताः(प्र.६.४) (कलाः - प्राणः, श्रद्धा, आकाशादिपञ्चकम्, इन्द्रियम्, मनः, अन्नम्, वीर्यम्, तपः, मन्त्राः, कर्म, लोकाः, नाम, इत्येता नव (प्र.६.४)। यद्यपि वस्तुतः सर्वा एव कलाः प्रलीयन्ते, तथापि व्यवहारदृष्ट्या नाम्न आकृतिसम्बन्धान्नित्यत्वे सति, नाममात्रं न लीयत इत्यभिप्रायेण पञ्चदशेत्युक्तमिति भाति । **'किमेतं न जहातीति नामेति'** (बृ. ३.२.१२) इति श्रुत्यन्तरे उक्तत्वात्।) चक्षुरादिकरणस्थाः देहाश्रयाः सर्वे देवाः, (करणानुग्राहकत्वेन स्थिता देवतांशाः आदित्यादिषु प्रतिदेवतासु गता भवन्तीत्यर्थः।) कर्माणि मुमुक्षुणा कृतानि अप्रवृत्तफलानि, (प्रवृत्तफलानि तु उपभोगेनैव क्षीयमाणानि भवन्ति।) विज्ञानमयश्च आत्मा अविद्याकृतबुद्ध्याद्युपाधिम् आत्मत्वेन मत्वा, जलादिषु सूर्यादिप्रतिबिम्बवत् इह प्रविष्टो देहभेदेषु (प्रतिबिम्बा इव देहभेदेषु बहुत्वेऽपि स्वरूपतः परमात्मा एव अद्वितीयः इत्यर्थः)। त एते कर्माणि (कर्मणां तत्फलार्थत्वात् , तेनैव विज्ञानमयेन आत्मना सह इत्यर्थः। अतो विज्ञानमयो विज्ञानप्रायः) विज्ञानमयश्च आत्मा उपाध्यपनयने सति, परे, अव्यये, अनन्ते, अक्षये, ब्रह्मणि आकाशकल्पे, अजे, अजरे, अमृते, अभये, अपूर्वे, अनपरे, अनन्तरे, अबाह्ये, अद्वये, शिवे, शान्ते, सर्वे एकीभवन्ति अविशेषतां गच्छन्ति । जलाद्याधारापनये सूर्यादिप्रतिबिम्बाः सूर्ये इव, घटाद्यपनये घटाद्याकाशाः आकाशे इव । एकत्वम् आपद्यन्ते इति यावत् ।

**ज्ञानिनः नामरूपाद्विमुक्त्यादिरूप-ज्ञानफलम्**

तथा च ज्ञानिनः 'ब्रह्मभावसमकाले नामरूपाद्विमुक्तिः' 'ब्रह्मवित् ब्रह्मैव भवति' 'गुहाग्रन्थिभ्यो विमुक्तस्सन् अमृतो भवती'ति वाक्यद्वयेन एवमुच्यते -

**यथा नद्यः स्यन्दमानाः समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय ।**
**तथा विद्वान् नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम् ॥**
**स यो ह वै तत्परमं ब्रह्म वेद ब्रह्मैव भवति नास्याब्रह्मवित्कुले भवति ।**

Cover Page
INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
( Fulfilled Suggests Parametres of UGC by IJMER)
Volume:14, Issue:8(3), August, 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed : Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available : www.ijmer.in

**तरति शोकं तरति पाप्मानं गुहाग्रन्थिभ्यो विमुक्तोऽमृतो भवति॥**(मुं.३.२.८-९) इति।

यथा गङ्गाद्याः नद्यः गच्छन्त्यः समुद्रं प्राप्य, नाम च रूपं च हित्वा अदर्शनम् अविशेषात्मभावं प्राप्नुवन्ति, तथा विद्वान् अविद्याकृतनामरूपात् विमुक्तः सन् परात् अक्षरात् , परं दिव्यं पुरुषं यथोक्तलक्षणम् उपगच्छतीति भावः।

अत्र भाष्यकाराः 'ननु श्रेयसि अनेके विघ्नाः प्रसिद्धाः। अतः क्लेशानामन्यतमेन, अन्येन वा देवादिना विघ्नितो ब्रह्मविदपि, मृतः अन्यां गतिं गच्छति, न ब्रह्मैव, इत्याक्षिप्य, समादधन्ते । न । **विद्ययैव सर्वप्रतिवन्धस्य अपनीतत्वात् । अविद्याप्रतिबन्धमात्रो हि मोक्षः, नान्यप्रतिबन्धः। नित्यत्वात्, आत्मभूतत्वाच्च** इति ।

तस्मात् यः कश्चित् लोके तत् परमं ब्रह्म वेद 'साक्षात् अहमेवास्मी'ति जानाति स नान्यां गतिं गच्छति। देवैरपि तस्य ब्रह्मप्राप्तिं प्रति विघ्नः न शक्यते कर्तुम् । आत्मा ह्येषां स भवति । तस्मात् ब्रह्म विद्वान् ब्रह्मैव भवति । किञ्च, अनेक-इष्टवैकल्यनिमित्तं मानसं सन्तापं जीवन्नेव तरति । धर्माधर्माख्यं पाप्मानञ्च तरति। तथा **भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः। क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे॥** (मुं.२.२.९) इति पूर्वमुक्तप्रकारेण गुहाग्रन्थिभ्यः हृदयस्थ-अविद्याग्रन्थिभ्यः विमुक्तस्सन् अमृतो भवतीति सारः।

एवमस्मिन् शोधलेखे आदौ मुण्डकोपनिषत्परिचयः, तत्पश्चात् अक्षराख्यादात्मनः विश्वोत्पत्तिः, पराऽपरेति विद्याविभागः, ज्ञानमार्गप्रशंसा, आत्मलाभार्थं सवैराग्यं गुरूपसत्तिः, आत्मज्ञानप्राप्त्यर्थं मुख्योपायः, आत्मज्ञानप्राप्त्यर्थं सहकारिसाधनानि, ज्ञानिनो ब्रह्मभावः, देहारम्भिकप्राणादिकलानां कर्मसहितस्य विज्ञानात्मनः परमात्मन्येकीभावः, ज्ञानिनः नामरूपाद्विमुक्त्यादिरूपज्ञानफलम्, इत्येते अंशाः शङ्करभाष्यानुसारं, तथा होळेनरसीपुरस्थैः अध्यात्मप्रकाशकार्यालयसंस्थापकैः ब्रह्मीभूतैः श्रीसच्चिदानन्देन्द्रसरस्वतीस्वामिभिः कृतटिप्पण्यनुसारञ्च चिन्तिताः। 'आत्मज्ञानमेव सर्वदुःखनिवारणे एकमात्रोपायः' इत्यतः दुःखनिवृत्तिकामाः आत्मज्ञानसाधनमार्गे पथिका भवन्त्वित्याशास्य विरम्यते विस्तरादिति शम् ।

**परामृष्टग्रन्थाः**

1. **मुण्डकोपनिषत्**
Editor : Sri sachchidaanandenra sarasvati swami
I Edition – 1960,
Pub : Adhyatma Prakasha Karyalaya
Holenaraseepur, Hasan Dist. K.A.State – 573211
2. **प्रश्नोपनिषत्**
Editor & Translator
Sri sachchidaanandenra sarasvati swami
IV Edition – 1992,
Pub : Adhyatma Prakasha Karyalaya
Holenaraseepur, Hasan Dist. K.A.State – 573211
3. **ब्रह्मसूत्रभाष्यम्**
Editors – Pt. AnanthakriShna shastri &
Vasudeva Lakshmana Shastri Panshikar
Reprint – 2002, Pub. By RASTRIYA SAMSKRIT SAMSTHAN
56-57, Institutional Aria, Janakapuri
New Delhi – 110058,
4. **महाभारतम्, (मोक्षधर्मपर्व)** Vol.5
Translator : R.N.Shastri Pandeya
13th Edi. Vikrama Samvatsara -2065
Geetha Press, Gorakh Pur -273005